# ॥ श्री गणपत्यथर्वशीर्षम् स्तोत्रम् ॥

ॐ भद्रं कर्णेभिः शृणुयामदेवाः भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवा☒ सस्तनूभिःव्यशेम देवहितं यदायुः ॥
स्वस्ति न इन्द्रो वृद्धश्रवाःस्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्ताक्ष्यों अरिष्टनेमिःस्वस्ति नो बृहस्पतिर्दधातु ॥
ॐ शान्तिः! शान्तिः!! शान्तिः!!!
हरिः ॐ नमस्ते गणपतये ।त्वमेव प्रत्यक्षं तत्त्वमसि ।
त्वमेव केवलं कर्तासि ।त्वमेव केवलं धर्तासि ।
त्वमेव केवलं हर्तासि ।त्वमेव सर्वं खल्विदं ब्रह्मासि ।
त्वं साक्षादात्मासि नित्यम् ॥ १॥
ऋतं वच्मि । सत्यं वच्मि ॥ २॥
अव त्वं माम् । अव वक्तारम् । अव श्रोतारम् ।
अव दातारम् । अव धातारम् । अवानूचानमव शिष्यम् ।
अव पश्चात्तात् । अव पुरस्तात् । अवोत्तरात्तात् ।
अव दक्षिणात्तात् । अव चोर्ध्वात्तात् ।
अवाधरात्तात् । सर्वतो मां पाहि पाहि समन्तात् ॥ ३॥
त्वं वाङ्मयस्त्वं चिन्मयः ।
त्वमानन्दमयस्त्वं ब्रह्ममयः ।
त्वं सच्चिदानन्दाद्वितीयोऽसि ।
त्वं प्रत्यक्षं ब्रह्मासि ।
त्वं ज्ञानमयो विज्ञानमयोऽसि ॥ ४॥
सर्वं जगदिदं त्वत्तो जायते ।
सर्वं जगदिदं त्वत्तस्तिष्ठति ।
सर्वं जगदिदं त्वयि लयमेष्यति ।
सर्वं जगदिदं त्वयि प्रत्येति ।
त्वं भूमिरापोऽनलोऽनिलो नभः ।
त्वं चत्वारि वाक्पदानि ॥ ५॥

वैदिक जीवन™
Sanatan Online Store
www.vaidikjeevn.com
Ver 1.0.0
7706011555
www.vaidikjeevn.com

# ॥ श्री गणपत्यथर्वशीर्षम् स्तोत्रम् ॥

त्वं गुणत्रयातीतः। त्वं अवस्थात्रयातीतः।
त्वं देहत्रयातीतः। त्वं कालत्रयातीतः।
त्वं मूलाधारस्थितोऽसि नित्यम्।
त्वं शक्तित्रयात्मकः। त्वां योगिनो ध्यायन्ति नित्यम्।
त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वमिन्द्रस्त्वमग्निस्त्वं
वायुस्त्वं सूर्यस्त्वं चन्द्रमास्त्वं ब्रह्म भूर्भुवः स्वरोम् ॥ ६॥
गणादिं पूर्वमुच्चार्य वर्णादिंस्तदनन्तरम्। अनुस्वारः परतरः।
अर्धेन्दुलसितम्। तारेण ऋद्धम्। एतत्तव मनुस्वरूपम्।
गकारः पूर्वरूपम्। अकारो मध्यमरूपम्। अनुस्वारश्चान्त्यरूपम्।
बिन्दुरुत्तररूपम् नादः सन्धानम्। संहिता सन्धिः।
सैषा गणेशविद्या। गणक ऋषिः। निचृद्गायत्री छन्दः।
श्रीमहागणपतिर्देवता। ॐ गं गणपतये नमः ॥ ७॥
एकदन्ताय विद्महे वक्रतुण्डाय धीमहि।
तन्नो दन्तिः प्रचोदयात् ॥ ८॥
एकदन्तं चतुर्हस्तं पाशमङ्कुशधारिणम्।
रदं च वरदं हस्तैर्बिभ्राणं मूषकध्वजम् ॥
रक्तं लम्बोदरं शूर्पकर्णकं रक्तवाससम्।
रक्तगन्धानुलिप्ताङ्गं रक्तपुष्पैः सुपूजितम् ॥
भक्तानुकम्पिनं देवं जगत्कारणमच्युतम्।
आविर्भूतं च सृष्ट्यादौ प्रकृतेः पुरुषात्परम् ॥
एवं ध्यायति यो नित्यं स योगी योगिनां वरः ॥ ९॥
नमो व्रातपतये नमो गणपतये नमः
प्रमथपतये नमस्तेऽस्तु लम्बोदराय एकदन्ताय
विघ्नविनाशिने शिवसुताय श्रीवरदमूर्तये नमः ॥ १०॥
एतदथर्वशीर्षं योऽधीते। स ब्रह्मभूयाय कल्पते।
स सर्वविघ्नैर्न बाध्यते। स सर्वतः सुखमेधते।
स पञ्चमहापापात् प्रमुच्यते।

# ॥ श्री गणपत्यथर्वशीर्षम् स्तोत्रम् ॥

सायमधीयानो दिवसकृतं पापं नाशयति ।
प्रातरधीयानो रात्रिकृतं पापं नाशयति ।
सायं प्रातः प्रयुञ्जानः पापोऽपापो भवति ।
धर्मार्थकाममोक्षं च विन्दति ।
इदमथर्वशीर्षमशिष्याय न देयम् ।
यो यदि मोहाद् दास्यति । स पापीयान् भवति ।
सहस्रावर्तनाद्यं यं काममधीते । तं तमनेन साधयेत् ॥ ११॥
अनेन गणपतिमभिषिञ्चति । स वाग्मी भवति ।
चतुर्थ्यामनश्नन् जपति । स विद्यावान् भवति ।
इत्यथर्वणवाक्यम् । ब्रह्माद्याचरणं विद्यान्न बिभेति कदाचनेति ॥ १२॥
यो दूर्वाङ्कुरैर्यजति स वैश्रवणोपमो भवति ।
यो लाजैर्यजति । स यशोवान् भवति । स मेधावान् भवति ।
यो मोदकसहस्रेण यजति स वाञ्छितफलमवाप्नोति ।
यः साज्य समिद्भिर्यजति । स सर्वं लभते स सर्वं लभते ॥ १३॥
अष्टौ ब्राह्मणान् सम्यग्
ग्राहयित्वा सूर्यवर्चस्वी भवति ।
सूर्यग्रहे महानद्यां प्रतिमासन्निधौ
वा जप्त्वा सिद्धमन्त्रो भवति ।
महाविघ्नात् प्रमुच्यते । महादोषात् प्रमुच्यते ।
महापापात् प्रमुच्यते । महाप्रत्यवायात् प्रमुच्यते ।
स सर्वविद्भवति स सर्वविद्भवति ।
य एवं वेद । इत्युपनिषत् ॥ १४॥
ॐ भद्रं कर्णेभिः शृणुयामदेवाः भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवा⊠ सस्तनूभिःव्यशेम देवहितं यदायुः ॥
स्वस्ति न इन्द्रो वृद्धश्रवाःस्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिःस्वस्ति नो बृहस्पतिर्दधातु ॥
ॐ शान्तिः! शान्तिः!! शान्तिः!!!
॥ इति श्रीगणपत्यथर्वशीर्षं समाप्तम् ॥